# ॥ दुर्गासूक्तम् ॥



जातवेदसे सुनवाम सोम–मरातीयतो निदहाति वेदः ।

स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ॥

दुर्गां देवीगं् शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥

अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा ।

पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥

विश्वानि नो दुर्गहा जातवेद–स्सिन्धुं न नावा दुरिताऽतिपर्षि ।

अग्ने अत्रिवन् मनसा गृणानो–ऽस्माकं बोध्यविता तनूनाम् ॥

पृतना जितगं् सहमान–मुग्रमग्निगं् हुवेम परमाथ्सधस्थात् ।

स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिताऽत्यग्निः ॥

प्रत्नोषिक मीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।

स्वां चाऽग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभग–मायजस्व ॥

गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम ।

नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

# || durgāsūktam ||



jātavēdasē sunavāma sōma marātīyatō nidahāti vēdaḥ |
sa naḥ par̆ṣadati durgāṇi viśvā nāvēva sindhuṁ duritāऽt-yagniḥ ||
tām-agnivarṇāṁ tapasā jvalantīṁ vairōcanīṁ karma-phalēṣu juṣṭām ||
durgāṁ dēvīgṁ śaraṇam-ahaṁ prapadyē sutarasi tarasē namaḥ ||
agnē tvaṁ pārayā navyō asmān-svastibhirati durgāṇi viśvā |
pūśca pr̥thvī bahulā na urvī bhavā tōkāya tanayāya śaṁyōḥ ||
viśvāni nō durgahā jātavēda-ssindhuṁ na nāvā duritāऽti-parṣi |
agnē atrivan manasā gr̥ṇānō-ऽsmākaṁ bōdhyavitā tanūnām ||
pr̥tanā jitagṁ sahamāna-mugram-agnigṁ huvēma paramāth-sadhasthāt |
sa naḥ par̆ṣadati durgāṇi viśvā kṣāmaddēvō ati duritāऽt-yagniḥ ||
pratnōṣika mīḍyō adhvarēṣu sanācca hōtā navyaśca satsi |
svāṁ cāऽgnē tanuvaṁ pipraya-svāsmabhyaṁ ca saubhaga-māyajasva ||
gōbhir-juṣṭamayujō niṣiktaṁ tavēndra viṣṇōr-anusaṁcarēma |
nākasya pr̥ṣṭham-abhi saṁvasānō vaiṣṇavīṁ lōka iha mādayantām ||
kātyāyanāya vidmahē kanyakumāri dhīmahi |
tannō durgiḥ pracōdayāt ||
ōm̐ śāntiḥ śāntiḥ śāntiḥ ||